सचेत किया अत्र नीतिः (हि) निश्चयसे (आर्ति संभवे) पीड़ाके होने पर (विपत्ति कालमें) (विदुषां) विद्वानोंका (तत्वज्ञानं जागर्त्येव) सच्चा ज्ञान जागृत ही रहता है ॥ ५७ ॥

शोकेनालमपुण्यानां पापं किं न फलप्रदम् ।
दीपनाशे तमोराशिः किमाह्वानमपेक्षते ॥ ५८ ॥

अन्वयार्थः—राजा कहने लगा (शोकेन अलम्) शोक नहीं करना चाहिये ? (अपुण्यानां) पुण्य रहित (पापी पुरुषोंका) (पापं) पाप (किं) क्या ? (फल प्रदम् न) फल देनेवाला नहीं होता किंतु (स्यादेव) होता ही है (किं) क्या (दीपनाशे) दीपकके नाश हो जाने पर (तमो राशिः) अन्धकारकी पङ्क्ति (आह्वानमपेक्षते) बुलानेकी अपेक्षा करती है किंतु (नापेक्षते) स्वयं आजाती है ॥५८॥

यौवनं च शरीरं च संपच्च व्येति नाद्भुतम् ।
जलबुद्बुदनित्यत्वे चित्रीया न हि तत्क्षये ॥ ५९ ॥

अन्ययार्थः—(यौवन) जोवन (च) और (शरीरं) शरीर (च) और (सम्पत्) धन ये सब (व्येति) नाशको प्राप्त होते हैं (अत्र अद्भुतं न) इसमें कोई आश्चर्यकी बात नहीं हैं ? (जलबुद्बुदनित्यत्वे) पानीके बुल बुलेके वहुत देर तक ठहरनेमें (चित्रिया) आश्चर्य है (हि) निश्चयसे (तत्क्षये चित्रियान) उसके नाश होनेमें कोई अचरज नहीं है इसी प्रकार सांसारिक वस्तुके ठहरनेमे आश्चर्य है उसके क्षयमें नहीं ॥ ५९ ॥

संयुक्तानां वियोगश्च भविता हि नियोगतः ।
किमन्यैरङ्गतोऽप्यङ्गी निःसङ्गो हि निवर्तते ॥ ६० ॥

अन्ययार्थः—(संयुक्तानां) संयोगी पदार्थोंका (नियोगतः) अवश्य ही (वियोगः) वियोग (भविता) होता है। (अन्यैः किं) और तो क्या ? (अङ्गतः) इस शरीरसे (अङ्गी अपि) आत्मा भी (निःसंगो निवर्तते) शरीरको छोडकर चला जाता है ॥ ९० ॥

अनादौ सति संसारे केन कस्य न बन्धुता ।
सर्वथा शत्रुभावश्च सर्वमेतद्धि कल्पना ॥ ६१ ॥

अन्ययार्थः—(संसारे) संसारके (अनादौ सति) अनादि होनेपर (कस्य) किसकी (केन) किसके साथ (बन्धुता शत्रुता च न) मित्रता और शत्रुता नहीं है अतएव किसीको (सर्वथा शत्रुभावः मित्रभावश्च) सर्वथा शत्रु व मित्र समझना (सर्वमेतद्कल्पना) ये सब कल्पना मात्र ही है ॥ ६१ ॥

इति धर्म्यं वचस्तस्या लेभे नैव पदं हृदि ।
दग्धभूम्युप्तबीजस्य न ह्यङ्कुरसमर्थता ॥६२॥

अन्वयार्थः—(इति) इस प्रकार (धर्म्यवचः) नीति युक्त वचनोंने (तस्याः) उस विजया रानीके (हृदि) हृदयमें (पदं) स्थानको (नैव) नहीं (लेभे) प्राप्त किया अत्र नीति (हि) निश्चयसे (दग्धभूम्युप्त बीजस्य) जली हुई पृथ्वीमें बोए हुए बीजके अन्दर (अंकुर समर्थता न भवति) अकुर पैदा होनेकी शक्ति नहीं होती है ॥६२॥

अयं त्वापन्नसत्त्वां तामारोप्य शिखियन्त्रकम् ।
स्वयं तद्भ्रामयामास हन्त क्रूरतमो विधिः ॥६२॥

अन्वयार्थः—(तु) तदनन्तर (अयं) राजा (आपन्नसत्वां तां) गर्भवती उस रानीको (शिखियन्त्रकम्) मयूर यन्त्रमें (आरोप्य) बिठला करके (हन्त) खेद है ? (स्वयं) अपने आप (तद्) उसको

(भ्रामयामास) घुमाता भया (अत्र नीति) (विधिः क्रूरतमः) पूर्वोपार्जित कर्म अत्यन्त कठोर होते हैं ॥ तात्पर्य कर्म रंक राजाका विचार नहीं करता सबको एकसा ही फल देता है ॥ ६३ ॥

वियतास्मिन्गते योद्धुं स मोहादुपचक्रमे ।
न ह्यङ्गुलिरसाहाय्या स्वयं शब्दायतेतराम् ॥६४॥

अन्वयार्थः—(अस्मिन्) इस यन्त्रके (वियता गते) आकाश मार्गसे ऊपर चले जाने पर (सः) उस राजाने (मोहात्) मोहके वशसे (योद्धुं) लड़ना (उपचक्रमें) प्रारम्भ किया। अत्र नीतिः (हि) निश्चयसे (असाह्यांगुलिः स्वयं) अकेली उंगली अपने आप (नशब्दायते तराम्) शब्दको नहीं करती है अर्थात् विना निमित्तके लड़ाई नहीं होती है ॥ ६४ ॥

अथ युद्ध्वा चिरं योद्धा मुधा प्राणिवधेन किम् ।
इत्यूहेन विरक्तोऽभूद्गत्यधीनं हि मानसम् ॥ ६५ ॥

अन्वयार्थः—(अथ) तदनन्तर (योद्धा) योधा राजा (चिरयुध्वा) बहुत काल युद्ध करके (मुधा) निष्प्रयोजन (प्राणिवधेन) प्राणियोंकी हिंसासे (कि) क्या फल है ? (इति ऊहेन) ऐसा विचार करके (विरक्तोऽभूत) लड़ाईसे उदासीन हो गया अत्र नीतिः (हि) निश्चयसे (गत्यधीनं मानसम्) गतिके अनुकूल ही मनके भाव होते हैं। अर्थात् जिसको जिस गतिमे जाना होता है उसके मृत्युके समय वैसे ही भाव हो जाते हैं ॥ ६५ ॥

विषयासङ्गदोषोऽयं त्वयैव विषयीकृतः ।
सांप्रतं वा विषप्रख्ये मुञ्चात्मन्विषये स्पृहाम् ॥६६॥

अन्वयार्थः—(हे आत्मन्) हे आत्मा (अयं) इस (विषया-

सक्तिः दोषः) विषयासक्ति दोषको (त्वया एव) तूने ही (विषयी कृतः) प्रत्यक्ष कर लिया है अतएव (सांप्रत वा) अब तो (विष प्रख्ये) विषके समान (विषये) इन्द्रियोंके विषयमें (स्पृहां) इच्छाको (मुञ्च) छोड दे ॥ ६६ ॥

भुक्तपूर्वमिदं सर्वं त्वयात्मन्भुज्यते ततः।
उच्छिष्टं त्यज्यतां राज्यमनन्ता ह्यसुभृद्भवाः ॥६७॥

अन्वयार्थः—और (हे आत्मन्) हे आत्मा (इदं सर्वं) यह सब (भुक्त पूर्वं) पूर्व जन्ममें भोगे हुएको (त्वया) तू (भुज्यते) भोगता है (अतः) इस लिये (उच्छिष्ट राज्यं) उच्छिष्ट राज्यको (त्यज्यतां) त्याग दे अब नीतिः (हि) निश्चयसे (असुभृद्भवाः) जीवोंके भव (अनन्ताः) अनन्त (सन्ति) होते है। तात्पर्य—अनन्त जन्मोंमेसे बहुतसे जन्मोंमें इस जीवने राजसुख भोगा है इसलिये वह उच्छिष्टके समान है ॥ ६७ ॥

अवश्यं यदि नश्यन्ति स्थित्वापि विषयाश्चिरम्।
स्वयं त्याज्यास्तथा हि स्यान्मुक्तिः संसृतिरन्यथा॥६८॥

अन्वयार्थः—(यदि) अगर (विषयाः) इन्द्रियोंके विषय (चिरं) बहुत काल तक (स्थित्वापि) स्थिर रहकर भी (अवश्यं) अवश्य (नश्यति) नाशको प्राप्त हो जाते हैं तो (स्वयं) स्वय ही (त्याज्यः) छोड देने चाहिये (तथाहि) ऐसा करने पर (मुक्तिः स्यात्) आत्मा कर्म बन्धनसे मुक्त होती है (छूट जाती है) (अन्यथा) इसके विपरीत करनेसे (संसृतिरेव स्यात्) संसार ही होता है ॥ ६८ ॥

त्यज्यते रज्यमानेन राज्येनान्येन वा जनः ।
भज्यते त्यज्यमानेन तत्यागोऽस्तु विवेकिनाम् ॥६९॥

अन्वयार्थः—(रज्य मानेन राज्येन अन्येन वा जनः) राग विषय कृत राज्य अथवा अन्य वस्तुसे मनुष्य त्यज्यते) छोडा जाता है (त्यज्यमानेन) त्याग विषयी कृत वस्तुसे (जनः) मनुष्य (भज्यते) सेवन किया जाता है (ततः) इसलिये (विवेकिनाम्) विचारवान् पुरुषोंको (तद्) उसका (त्यागोऽस्तु) त्याग करना ही उचित है ।

तात्पर्यः—मनुष्य जिस वस्तुकी इच्छा करता है वह वस्तु उसको प्राप्त नहीं होती है किन्तु अनिच्छित वस्तु प्राप्त हो जाती है अतएव महात्मा पुरुष सांसारिक पदार्थोंमें उदासीन ही रहते हैं ॥ ६९ ॥

इति भावनया राजा वैराग्य परमीयिवान् ।
त्यक्त्वा सङ्गं निजाङ्गं च दिव्यां संपदमासदत् ॥७०॥

अन्वयार्थः—(राजा) राजाने (इति भावनया) इस प्रकारकी भावनासे (परम्) उत्कृष्ट (वैराग्यं) वैराग्य (ईयिवान्) प्राप्त किया और फिर अन्तमें (सङ्ग) परिग्रह (निजाङ्गं च) और अपने शरीरको (त्यक्त्वा) छोडकर (दिव्यां संपदं) स्वर्गसबंधी ऐश्वर्यको (आसदत्) प्राप्त करता भया ॥ ७० ॥

पौराः जानपदाः सर्वे निर्वेदं प्रतिपेदिरे ।
पीडा ह्यभिनवा नृणां प्रायो वैराग्यकारणम् ॥७१॥

अन्वयार्थः—उस समय (सर्वे पौराः) सारे पुरवासी (च) और

(जनपदा) देशनिवासी (निर्वेदं) उदास और विरक्त पनेको (प्रतिपेदिरे) प्राप्त हुए ? अत्र नीतिः (हि) निश्चयसे (अभिनवा) नई तुरंतको (पीड़ा) पीडा (नृणा) मनुष्योंको (प्राय वैराग्य कारणम्) प्राय. वैराग्यका कारण होती है अर्थात् यह एक नियमसा है कि संसारी लोग नई अच्छी या बुरी वार्तासे शीघ्र ही सुख और दु:खका अनुभवन किया करते हैं ॥ ७१ ॥

अधिस्त्रि रागः क्रूरोऽयं राज्यं प्राज्यमसूनपि ।
तद्वञ्चिता हि मुञ्चन्ति किं न मुञ्चन्ति रागिणः ॥७२॥

अन्वयार्थ—(अयं) यह (अधिस्त्रिरागः) स्त्री विषयक प्रेम वा अनुराग (क्रूर) बड़ा क्रूर वा कठोर है (तद्वञ्चिता) उसके ठगाये हुए मनुष्य (प्राज्य राज्यं) बडे भारी राज्यको और (असूनपि) प्राणोंको भी (मुञ्चन्ति) छोड़ देते हैं ? सच है (रागिणः) रागी पुरुष (किं न) क्या नहीं (मुञ्चन्ति) छोड देते हैं अर्थात् (सर्व मुञ्चन्ति) सबको छोड़ देते है ॥ ७२ ॥

नारीजघनरन्ध्रस्थविण्मूत्रमयचर्मणा ।
वराह इव विड्भक्षी हन्त मूढः सुखायते ॥७३॥

अन्वयार्थ.—(हन्त) खेद है ? (मूढ.) मूर्ख जन (नारी जघन रंध्रस्थ विण्मूत्रमय चर्मणा) स्त्रियोंकी जघाओंके छिद्रमें स्थित मलमूत्रसे भरे हुए चमड़ेसे (विड्भक्षी) विष्टा खानेवाले (वराह इव) शूकरकी तरह (सुखायते) सुखी होते हैं अर्थात् विषयासक्त मूर्ख जन निन्दनीक विषय भोगादिकमें भी आनन्द करते हैं ॥ ७३

किं कीदृशं कियत्केति विचारे सति दुःसहम् ।
अविचारितरम्यं हि रामासंपर्कजं सुखम् ॥ ७४ ॥

अन्वयार्थः—वह सुख (कि) क्या है (कीदृशं) कैसा है (कियत्) कितना है (क) कहां है (इति विचारे सति) ऐसा विचार करने पर (दुःसहम्) दुःसह हो जाता है अर्थात् (रामा संपर्कजं) स्त्रीके संगसे उत्पन्न (सुखं) सुख (अविचारितरम्य) विना विचारके ही सुन्दर है ॥ ७४ ॥

निवारिताप्यकृत्ये स्यान्निष्फला दुष्फला च धीः ।
कृत्ये तु नापि यत्नेन कोऽत्र हेतुर्निरूप्यताम् ॥७५॥

अन्वयार्थ—(अकृत्ये) बुरे काममें (निवारितापि) निवारण किये जाने पर भी (धी.) बुद्धि (निष्फला) फल रहित (च) और (दुष्फला) बुरे फल वाली (स्यात्) प्रवृत्त होती है (तु) किन्तु (कृत्ये) अच्छे काममें (प्रयत्नेन अपि) प्रयत्न करनेसे भी (न) नहीं (प्रवर्तते) प्रवृत्त होती है। (अत्र हेतु निरूप्यतां) कहो इसमें क्या हेतु है ?

अर्थात् बुरे कामोंमें आत्माकी प्रवृति विना उपदेशके भी होजाती है किन्तु सत्कार्यमे सदुपदेश मिलनेपर भी वैसी प्रवृति नहीं होती ॥

निश्चित्याप्यघहेतुत्वं दुश्चित्तानां निवारणे ।
येनात्मन्निपुणो नासि तद्धि दुष्कर्मवैभवम् ॥ ७६ ॥

अन्वयार्थः—(हे आत्मन्) हे आत्मा (दुश्चित्तानां) बुरे मानसीक विचारोंको (अघहेतुत्वं) पापका कारण (निश्चित्य) निश्चय

करके (अपि) भी (येन) जिस कारणसे (त्व) तू (निवारणे) निवारण करनेमे (निपुणः) समर्थ (नासि) नहीं होता है (हि) निश्चयसे (तत् दुष्कर्म वैभवम्) यह बुरे कर्मोका ही प्रभाव है ।

अर्थात् दुर्व्यसनोंका फल बुरा होता है ऐसा समझने पर भी आत्मा उनको छोड़नेमे असमर्थ दुष्कर्मके प्रभावसे ही होता है ॥ ७६ ॥

हेये स्वयं सती बुद्धिर्यत्नेनाप्यसती शुभे ।
तद्धेतुकर्म तद्वन्तमात्मानमपि साधयेत् ॥ ७७ ॥

अन्वयार्थ.—(बुद्धिः) बुद्धि (हेये) बुरे कार्यमें (स्वयं सती) अपने आप ही लग जाती है किन्तु (शुभेयत्नेनापि असती) अच्छे कामोंमे प्रयत्न करने पर भी प्रवृत्त नहीं होती (तद्धेतु) इस प्रवृत्तिसे बंधनेवाला (कर्म) कर्म ही (आत्मानं अपि) आत्माको कर भी (तद्वन्तं कुर्वन्ति) वैसा ही कर देता है ॥७७॥

कोऽहं कीदृग्गुणः क्वत्यः किंप्राप्यः किंनिमित्तकः ।
इत्यूहः प्रत्यहं नो चेदस्थाने हि मतिर्भवेत् ॥ ७८ ॥

अन्वयार्थः—(अहं कः) मैं कौन हूं ? (कीदृग्गुण.) मुझमें कैसे गुण हैं ? (क्वत्यः) मैं कहांसे आया हूं ? (किं प्राप्यं) क्या प्राप्त कर सकता हूं ? किं निमित्तकः) और मैं किस निमित्तके लिये हूं ? (चेत्) यदि (इति ऊहः) इस प्रकार विचार (प्रत्यहं नस्यात्) प्रतिदिन नहीं होवे तो (हि) निश्चयसे (मतिः) मनुष्योंकी बुद्धि (अस्थाने भवेत्) अयुक्त स्थानमे प्रवृत्त हो जाती है ॥ ७८ ॥

मुह्यन्ति देहिनो मोहान्मोहनीयेन कर्मणा ।
निर्मितान्निर्मिताशेषकर्मणा धर्मवैरिणा ॥ ७९ ॥

अन्वयार्थ—(निर्मिता शेषकर्मणा) सम्पूर्ण कर्मोका निर्माण करनेवाले (धर्मवैरिणा) धर्मके शत्रु (मोहनीयेन कर्मणा) मोहनीय कर्मसे (निर्मितात्) उत्पन्न (मोहात्) मोहसे (देहिनाम्) प्राणी (मोहन्ति) अविवेकको प्राप्त होते हैं ॥

अर्थात् यह मोहनीय कर्मका ही प्रभाव है कि आत्मा अपने स्वभावको भूलकर पर पदार्थमें लुभा रहा है ॥७९॥

किं नु कर्तुं त्वयारब्धं किं नु वा क्रियतेऽधुना ।
आत्मन्नारब्धमुत्सृज्य हन्त बाह्येन मुह्यसि ॥ ८० ॥

अन्वयार्थः—(हे आत्मन्) हे आत्मा (त्वया) तूने (किंतु कर्तुं आरब्धं (क्या) तो करनेके लिये आरंभ किया था और (अधुना किं नु क्रियते) अब तू क्या कर रहा है ? (हन्त) बडे खेदकी बात है कि (आरब्धं उत्सृज्य) अपने प्रारंभ किये हुएको छोड़कर (बाह्येन) बाह्य पदार्थोंसे (मुह्यसि) मोहको प्राप्त हो रहा है ॥

अर्थात्—कर्तव्यको छोड़कर अकृत्यमें प्रवृत्ति करना अनुचित है ॥८०॥

इदमिष्टमनिष्टं वेत्यात्मन्संकल्पयन्मुधा ।
किं नु मोमुह्यसे बाह्ये स्वस्वान्तं स्ववशीकुरु ॥८१॥

अन्वयार्थः—(हे आत्मन्) हे आत्मा (इदं इष्टं वा अनिष्टं) यह इष्ट है अथवा अनिष्ट है (इति) इस प्रकार (मुधा) वृथा (संकल्पयन्) संकल्प करता हुआ (त्वं) तू (बाह्ये) बाह्य पदार्थोंमें (किनु) क्यों (मोमुह्यसे) मुग्ध हो रहा है इस लिये (स्वस्वा-

न्तं स्ववशी कुरु) अपने हृदयको अपने वशमें कर ॥

लोकद्वयाहितोत्पादि हन्त स्वान्तमशान्तिमत ।
न द्वेक्षि द्वेक्षि ते मौढ्यादन्यं संकल्प्य विद्विषम् ॥८२॥

अन्ययार्थः—(हन्त) बड़े खेदकी बात है (त्वं) तू (लोकद्वया हितोत्पादि) इस लोक और परलोकमें अहित (दु.ख)को उत्पन्न करने वाली (अशान्तिमत्) अशान्तिमय (ते स्वान्तं) अपने हृदयको (नद्वेक्षि) द्वेष नहीं करता है किन्तु (मौढ्यात्) मूर्खतासे (अन्य) दूसरोंको (विद्विषम् सकल्प्य) शत्रु, समझ कर (द्वेक्षि) द्वेष करता है ॥ ८२

अन्यदीयमिवात्मीयमपि दोष प्रपश्यता ।
कः समः खलु मुक्तोऽयं युक्तः कायेन चेदपि ॥८३॥

अन्वयार्थः—(अन्यदीय दोप इव) दूसरोके दोषोंके सदृश (आत्मीयं) अपने (अपि) भी (दोषं प्रपश्यता) दोषोको देखने वाले पुरुषके (सम) समान (अय) यह (क) कौन (खलु) निश्चयसे (कायेन युक्तः चेदपि) कायसे युक्त होता हुआ भी (मुक्तः) जीवन मुक्त है ॥

अर्थात् दूसरोंके दोषोंकी तरह अपने दोषोंको देखनेवाला ही सत्पुरुष कहलाता है ॥ ८३ ॥

इत्याद्यूहपरे लोके केकी तु वियता गतः ।
पातयमास राज्ञीं तां तत्पुरप्रेतवेश्मनि ॥ ८४ ॥

अन्वयार्थः—उस समय (इत्याद्यूहपरे) इस प्रकारके विचारमें मग्न (लोके) वहाके लोगोंके होनेपर (वियता गतः) आकाशमें गये हुए (केकी) यन्त्रने (तां राज्ञीं) उस विजया रानीको (तत्पुर

प्रेत वेश्मनि) उस नगरके बाहर श्मशानभूमिमें (पातयामास) डाल दिया ॥८४॥

जीवानां पापवैचित्री श्रुतवन्तः श्रुतौ पुरा ।
पश्येयुरधुनेतीव श्रीकल्पाभूदकिंचना ॥ ८५ ॥

अन्वयार्थः—(पुरा) पूर्व कालमें (श्रुतौ) शास्त्रोंमें (जीवानां पापवैचित्री) जीवोंके पापोंकी विचित्रता (श्रुतवन्तः) सुननेवाले पुरुष (अधुना) इस समय (पश्येयुः) देख लें कि (इतीव हेतो) इसी हेतुसे मानो (श्री कल्पा) लक्ष्मीके समान विजया रानी इस समय (अकिंचना अभूत्) जन धनसे निर्धन शून्य हो गई है ॥८५॥

क्षणनश्वरमश्वैर्यमित्यर्थं सर्वथा जनः ।
निरणैर्षीदिमां दृष्ट्वा दृष्टान्ते हि स्फुटा मतिः ॥८६॥

अन्वयार्थ.—(जनः) मनुष्य (ऐश्वर्यम् क्षणनश्वरम्) राज सम्पति क्षणमे नाश हो जाती है (इत्यर्थ) इस अर्थको (इमां दृष्ट्वा) रानीको देखकर (सर्वथा) सर्वथा (निर्णैषीत्) निर्णय कर लें ? क्योंक (दृष्टान्ते) दृष्टान्त मिलनेपर (मतिः) बुद्धि (स्फुटा भवेत्) विशद व निर्मल हो जाती है ॥ ८६ ॥

पूर्वाण्हे पूजिता राज्ञी राज्ञा सैवापराह्णके ।
परेतभूशरण्याभूत्पापाद्बिभ्यतु पण्डिताः ॥८७ ॥

अन्वयार्थः—(या राज्ञी) जो रानी (पूर्वाण्हे) प्रातः काल (राज्ञा) राजासे (पूजिता) पूजित थी (सा एव) उस ही रानीने (अपराण्हके) मध्यान्ह कालमें (परेतभूशरण्या भूत्) मसान भूमिका शरण लिया अत्र नीतिः अतएव (पापाद्) पापसे (पण्डित लोग डरें।

सा तु मूर्च्छापराधीना सूतिपीडामजानती ।
मासि वैजनने सूनुं सुषुवे हन्त तद्दिने ॥ ८८ ॥

अन्वयार्थ—(तु) तदनन्तर (हन्त) खेद है (तद्दिने) उसी दिन (वैजनने मासि) प्रसव मासमें (दशवें महीनेमे (मूर्छापराधीना सा) मूर्छाके आधीन उस रानीने (सूतपीडामजानती) प्रसूतकी पीडा नहीं जान कर (सूनु सुषुवे) पुत्र जना (उत्पन्न किया) ।

तावता देवता काचिद्धात्रीवेषेण सन्यधात् ।
तत्रैव पुत्रपुण्येन पुण्ये किं वा दुरासदम् ॥ ८९ ॥

अन्वयार्थ·—(तावता) उसी समय (तत्रैव) वहां पर (पुत्र पुण्येन) पुत्रके पुण्यसे (काचिद् देवता) कोई देवी (धात्री वेषेण) धायका वेष रखकर (सन्निधात्) आई। अत्र नीति. (पुण्ये कि) पुण्य रहने पर क्या ? (दुरासदम्) दुष्प्राप्य होता है (न किमपि) कुछ भी दुष्प्राप्य नही होता है ॥ ८९ ॥

तां पश्यन्त्या अभूत्तस्या उद्वेलः शोकसागरः ।
संनिधौ हि स्वबन्धूनां दुःखमुन्मस्तकं भवेत् ॥९०॥

अन्वयार्थः—(ता) उसको (पश्यंत्या) देखकर (तस्याः) रानीका (शोकसागर·) शोकरूपी सागर (उद्वेलः अभूत्) उमड़ पडा) और बढ गया। अत्र नीति· (हि) निश्चयसे (स्ववंधूनां) अपने वंधुओके (सनिधौ) निकट होनेपर (दु·ख) दु ख (उन्मस्तकं) भवेत्) उन्मस्तक (पूर्वसे अत्यन्त अधिक) होजाता है ॥ ९० ॥

देवता तु समाश्वास्य जातमाहात्म्यवर्णनैः ।
ऊर्णादिदर्शनोद्भूतैर्देवीं तामित्यवोचत ॥ ९१ ॥

अन्वयार्थः—(तु) तदनन्तर (देवता) देवीने (ऊर्णादि दर्शनोद्भूतैः) भौंके मध्यमें वालोके ऊपर भौरी इत्यादिक अनक चिन्ह दिखाकर (जातमाहात्म्यवर्णनै) बालकका माहात्म्य वर्णन करके (तां देवीं समाश्वास्य) उस रानीको विश्वास दिलाकर (इति अवोचत) इस प्रकार कहा ॥ ९१ ॥

पुत्राभिवर्धनोपाये देवि चिन्ता निवर्त्यताम् ।
क्षत्रपुत्रोचितं कश्चिदेनं संवर्धयिष्यति ॥ ९२ ॥

अन्वयार्थः—(देवि) हे देवी तू (पुत्राभिवर्धनो पाये) पुत्रकी वृद्धिके उपायमें (चिन्ता निवर्त्यताम्) चिन्ता मत कर (कश्चित्) कोई क्षत्रि पुत्रो चित) छत्रियोंके पुत्रोंके समान (एनं) इसका (संवर्धयिष्यति) पालन पोषण करेगा ॥ ९२ ॥

इत्युक्ते कोऽपि दृष्टोऽभूद्विसृष्टप्रेतसूनुकः ।
सूनुं सूनृतयोगीन्द्रवाक्यात्तत्र गवेषयन् ॥ ९३ ॥

अन्वयार्थः—(इत्युक्ते) ऐसा कहते ही (विस्टष्टप्रेतसूनकः) मसान भूमिमें रक्खा है मरे पुत्रको जिसने ऐसा और (सूनृत योगीन्द्रवाक्यात्) सत्यार्थ मुनिके वचनसे (तत्रसूनुं गवेषयन्) वहां पर जीवित पुत्रको ढूंढता हुआ (कोऽपि दृष्टः अभूत्) कोई दिखलाई दिया ॥ ९३ ॥

तद्दर्शनेन तद्वाक्यं प्रमाणं निर्णिनाय सा ।
निश्चलादविसंवादाद्वस्तुनो हि विनिश्चयः ॥ ९४ ॥

अन्वयार्थ.—(सा) उस विनया रानीने (तद्दर्शन) उस सेठके देखनेसे (तद्वाक्यं) देवीके वचनोंको (प्रमाणं निर्णिनाय) ठीक प्रमाण समझा। अत्र नीतिः (हि) निश्चयसे निश्चलात्) (अविसंवादात्)

निश्चल (स्थिर) विसंवाद रहित वचनसे (वस्तुनः) वस्तुका (विनिश्चय.) निश्चय होता है ॥ ९४ ॥

ततो गत्यन्तराभावाद्देवताप्रेरणाच्च सा ।
पित्रीयमुद्रयोपेतमाशास्यान्तरधात्सुतम् ॥ ९५ ॥

अन्वयार्थः—(ततः) तदंनतर (सा) वह रानी (गत्यतराभावात्) और कोई उपाय न देखकर (च) और (देवता प्रेरणात्) उस देवीकी प्रेरणासे (पित्रीय मुद्रयोपेतं) पिताकी मुद्रासे युक्त (सुतम्) पुत्रको (आशास्य) आशीर्वाद देकर (अन्तर्धात्) छिप गई ॥ ९५ ॥

गन्धोत्कटोऽपि तं पश्यन्नातृपद्वैश्यनायकः ।
एधोन्वेषिजनैर्दृष्टः किं वा न प्रीतये मणिः ॥ ९६ ॥

अन्वयार्थ —(वैश्यनायकः) वैश्योंका मुखिया (गन्धोत्कटः अपि) गन्धोत्कट भी (तं) उस पुत्रको (पश्यन्) देखकर (नातृपत्) तृप्तताको प्राप्त नहीं हुआ । अत्र नीतिः एधोन्वेषिजनैः) ईंधन ढूंढनेवाले मनुष्योसे (दृष्टः) देखी हुई (मणिः) मणि (किंवा) क्या (प्रीतये न भवति) प्रीतिके लिये नही होती है ? किन्तु (स्यादेव) होती ही है अर्थात् छोटे मनुष्योंसे देखी हुई उत्तम वस्तु प्रीतिकर ही होती है ॥ ९६ ॥

हर्षकण्टकिताङ्गोऽयमादधानस्तमङ्गजम् ।
जीवेत्याशिषमाकर्ण्य तन्नाम समकल्पयत् ॥ ९७ ॥

अन्वयार्थः—(हर्षकण्टकिताङ्गः) हर्षसे रोमाञ्चित है अङ्ग जिसका ऐसे (अयं) इस गन्धोत्कटने (तं अङ्गजं) उस पुत्रको

(आदधानः) उठाकर (जीव) जीव (इति आशिषम्) ऐसी आशीर्वाद (आकर्ण्य) सुनकर (तन्नाम समकल्पयत) जीवक वा जीवंधर उसका नाम रक्खा ॥ ९७ ॥

अमृतं सूनुमज्ञानात्संस्थितं कथमभ्यधाः ।
इति क्रुध्यन्स्वभार्यायै सानन्दोऽयमदात्सुतम् ॥९८॥

अन्वयार्थः—इसके पश्चात् उसने घर जाकर (स्वभार्यायै) अपनी स्त्रीके लिये (अमृतं) नहीं मरे हुए (सूनु) बालकको (अज्ञानात) अज्ञानसे तूने (कथं) कैसे (संस्थितं) मरा हुआ (अभ्यधाः) कह दिया (इति क्रुध्यन्) ऐसा कह कर क्रोध करता हुआ (सानन्द अयं) आनन्द सहित इसने (सुतं अदात) पुत्रको उसे सौंप दिया ॥ ९८ ॥

अभ्यनन्दीत्सुनन्दापि नन्दनस्यावलोकनात् ।
प्राणवत्प्रीतये पुत्रा मृतोत्पन्नास्तु किं पुनः ॥ ९९ ॥

अन्वयार्थः— (सुनन्दा अपि) वैश्यकी स्त्री सुनन्दा भी (नन्दनस्य) पुत्रको (अवलोकनात्) देखनेसे (अभ्यनन्दीत) अत्यन्त आनन्दित होती भई । अत्र नीतिः (ही) निश्चयसे (पुत्रः) पुत्र (प्राणवत्)प्राणोंकी तरह (प्रीतये भवन्ति) प्रीतिके लिये होते हैं (तु) और जो (मृतोत्पन्नः किं पुनः वक्तव्यः) पुत्र मर कर फिर जन्म धारण करते हैं ? उनका तो कहना ही क्या है ॥ ९९ ॥

देवता जननीमस्य बन्धुवेश्मपराङ्मुखीम् ।
दण्डकारण्यमध्यस्थमनैषीत्तापसाश्रमम् ॥ १०० ॥

अन्वयार्थः—(देवता) वह देवी (बन्धुवेश्मपराङ्मुखीं) बन्धुओंके घर जानेसे विमुख (अस्य जननीं) इस जीवंधरकी माताको (दण्डकारण्यमध्यस्थं) दण्डक वनके मध्यमें स्थित (तापसाश्रमम्) तपस्वियोंके आश्रममें (अनैषीत्) पंहुचाती भई ॥१००॥

कृत्वा च तां तपस्यन्तीं सतोषा सा मिषादगात् ।
समीहितार्थसंसिद्धौ मनः कस्य न तुष्यति ॥१०१॥

अन्वयार्थः—इसके पश्चात् (तां) उस रानीको (तपस्यन्तीं) तपश्चरण क्रियामें लगा करके (सतोषासा) संतुष्ट वह देवी किसी (मिषात्) बहानेसे (अगात्) चलीगई। अत्र नीतिः (समीहितार्थसंसिद्धौ) मनोमिलषत अर्थके सिद्ध हो जाने पर (कस्य मनः) किसका मन (न तुष्यति) संतुष्ट नहीं होता है ? किन्तु (संतुष्यत्येव) संतुष्ट ही होता है ॥ १०१ ॥

अवात्सीद्राजपत्नी च वत्सं निजमनोगृहे ।
जिनपादाम्बुजं चैव ध्यायन्ती हन्त तापसी ॥१०२॥

अन्वयार्थः—(हन्त) खेदकी बात है ? (तापसी) तपस्विनी (राजपत्नी) राजाकी स्त्री विजया पट्टरानी (जिन पादाम्बुजं) जिनेन्द्रके चरण कमलोंको (ध्यायन्ती) ध्यान करती हुई (निजमनोगृहे) अपने मनरूपी घरमें (वत्सं एव) जीवंधर पुत्रको ही (अवात्सीत्) निवास कराती भई ॥ १०२ ॥

अनल्पतूलतल्पस्थसवृन्तप्रसवादपि ।
निर्भरं हन्त सीदन्त्यै दर्भशय्याप्यरोचत ॥ १०३ ॥

अन्वयार्थः—और (हन्त) बड़े खेदकी बात है ? (अनल्प-

तूलतल्पस्थसवृन्तप्रसवाद् अपि) बहुतसी रूईके बिछे हुये है गद्दे जिस पर ऐसी शय्याके ऊपर पड़े हुए डोड़ी सहित पुष्पोंसे भी (निर्भरं) अत्यन्त (सीदन्तये) शरीरमें क्लेश मानने वाली रानीके लिये आज (दर्भशय्या अपि) डाभकी चटाई भी (अरोचत) रुचिकर हुई है ॥ १०३ ॥

स्वहस्तलूननीवारोऽप्याहारोऽस्याः परेण किम् ।
अवश्यं ह्यनुभोक्तव्यं कृतं कर्म शुभाशुभम् ॥१०४॥

अन्वयार्थ;—(परेण कि) और तो क्या ? (स्वहस्तलून-नीवारः अपि) अपने हाथसे काटा हुआ नीवार धान्य भी (अस्याः) इसका (आहारः अजनि) आहार हुआ । अत्र नीतिः (पूर्वकृतं) पूर्वमें किये हुए (शुभाशुभम् कर्म) शुभ वा अशुभ कर्म (अवश्यं अनुभोक्तव्यं) अवश्य ही भोगने पड़ते हैं ॥ १०४ ॥

अथ गन्धोत्कटायार्थमर्भकार्थं महोत्सवम् ।
आत्मार्थं गणयन्मूढः काष्ठाङ्गारोऽप्यदान्मुदा ॥१०५॥

अन्वयार्थः—(अथ) तदन्तर (मूढः) मूढ (काष्ठाङ्गारः) [illegible] (ही) निश्चयसे [illegible]ङ्गारने (अर्भकार्थं महोत्सवम्) बालकके जन्[illegible]वन्ति [illegible]वको (आत्मार्थं) अपने लिये (मेरे राजा होनेसे इसने यह महोत्सव किया है) (गणयन्) समझ कर उसने (गन्धोत्कटाय) गन्धोत्कट सेठके लिये (मुदा) हर्षसे (अर्थं) धन (अदात्) दिया ॥ १०५ ॥

तत्क्षणे तत्पुरे जाताञ्जातानपि तदाज्ञया ।
लब्ध्वा वैश्यपतिः पुत्रं मित्रैः सार्धमवर्धयत् ॥१०६॥

अन्वयार्थः—(वैश्यपतिः) वैश्योंमें प्रधान गन्धोत्कटने

(तत्क्षणे) उस दिन (तत्पुरे जातान्) उस पुरमें उत्पन्न हुए (जातान्) बालकोंको (तदाज्ञया) काष्टाङ्गारकी आज्ञासे (लब्ध्वा) प्राप्त करके (मित्रैः सार्धं) उन मित्रोंके साथ (पुत्रं अवर्धयत्) पुत्रको बढाया ॥ १०६ ॥

अथ जातः सुनन्दाया नन्दाढ्यो नामनन्दनः ।
तेन जीवंधरो रेजे सौभ्रात्रं हि दुरासदम् ॥ १०७ ॥

अन्वयार्थः—(अथ) तदनन्तर (सुनन्दायाः) गंधोत्कटकी स्त्री सुनन्दाके (नन्दाढ्यः नाम नन्दनः) नंदाढ्य नामका पुत्र (जातः) उत्पन्न हुआ (तेन) उस पुत्रसे (जीवन्धरः) जीवन्धर (रेजे) और शोभित होते भये। अत्रनीतिः (हि) निश्चयसे (सौभ्रात्रं दुरासदम्) अच्छे भाईका मिलना बड़ा कठिन है ॥ १०७ ॥

एवं सद्बन्धुमित्रोऽयमेधमानो दिने दिने ।
अतिशेते स्म शीतांशुमकलङ्काङ्गभावतः ॥ १०८ ॥

अन्वयार्थः—(एवं) इस प्रकार (सद्बन्धुः मित्रः अयं) श्रेष्ठ बन्धु और मित्र हैं जिसके ऐसे यह जीवंधर कुमार (दिने दिने) प्रतिदिन (एधमानः) बढते हुए (अकलङ्काङ्गभावतः) निर्दोष शरीरकी कान्तिसे (शीतांशु) चन्द्रमाको (अतिशेते स्म) जीतते भये ॥ १०८ ॥

ततः शैशवसंभूष्णुसर्वव्यसनदूरगः ।
पञ्चमं च वयो भेजे भाग्ये जाग्रति का व्यथा ॥१०९॥

अन्वयार्थः—(ततः) तदनन्तर (शैशवसंभूष्णुसर्वव्यसन दूरगः) बालक अवस्थामें होनेवाले सम्पूर्ण व्यसनोंसे रहित हो

हुए जीवंधर कुमारने (पञ्चमं वयो भेजे) पांचवें वर्षकी अवस्था प्राप्त की। अत्रनीतिः (भाग्ये) भाग्यके (जाग्रति सति) जागृत रहने पर (का व्यथा) कौन पीड़ा हो सकती हैं ? अर्थात् (अपि तु न कमपि) कोई भी नहीं हो सकती ॥ १०९ ॥

अथानर्थकमव्यक्तमतिहृद्यं च वाङ्मयम् ।
मुक्त्वातिव्यक्तगीरासीत्स्वयं वृणवन्ति हि स्त्रियः॥११०॥

अन्वयार्थः—(अथ) तदनन्तर (अनर्थकं) अर्थ शून्य (अव्यक्तं) अस्पष्ट शब्दवाली (च) और (अतिहृद्यं) अत्यन्त मनोहर (वाङ्मयम्) बालक अवस्थाकी तौतली भाषाको (मुक्त्वा) छोड़कर जीवंधरकुमार (अतिव्यक्तगीः आसीत्) अत्यन्त स्पष्ट भाषी हुआ। अत्र नीति. (ही) निश्चयसे (स्त्रियः स्वयं वृणवन्ति) स्त्रियें अच्छे पतिको स्वयं वर लेती हैं। अर्थात् अस्पष्ट सुसंस्कृत वाणीने जीवंधर स्वामीका आश्रयण किया ॥ ११० ॥

आचार्यैकवपुः कश्चिदार्यनन्दीति कीर्तितः ।
आसीदस्य गुरुः पुण्याद्गुरुरेव हि देवता ॥ १११ ॥

अन्वयार्थः—उस समय (कश्चिद् आचार्यएकवपुः) कोई आचार्यकी पदवीको प्राप्त और (आर्यनन्दीति कीर्तितः) आर्यनन्दी इस नामसे प्रसिद्ध (अस्य पुण्यात्) इस जीवंधरके पुण्यसे (गुरु- आसीत्) गुरु हुए। अत्र नीतिः (हि) निश्चयसे (गुरु एव देवता) गुरु ही देवता है ॥ १११ ॥

निष्प्रत्यूहेष्टसिद्ध्यर्थं सिद्धपूजादिपूर्वकम् ।
सिद्धमातृकया सिद्धामथ लेभे सरस्वतीम् ॥११२॥

अन्वयार्थः—(अथ) तदनन्तर कुमार (निष्प्रत्यूहेष्ट सिध्यर्थं) निर्विघ्न इष्ट सिद्धिके लिये (सिद्ध पूजादि पूर्वकम्) सिद्ध परमेष्टीकी पूजा करके (सिद्धमातृकया सिद्धां) अनादि स्वर व्यंजन मात्राओंसे प्रसिद्ध (सरस्वतीं) सरस्वतीको (लेभे) प्राप्त करते भये ॥ ११२ ॥

इति श्री वादीभसिंह सूरि विरचते क्षत्रचूड़ामणौ
सान्वयार्थो सरस्वतीलम्भो नाम प्रथमो लम्ब ॥

इति

अथ द्वितीयो लम्बः ॥

अथ विद्यागृहं किंचिदासाद्य सखिमण्डितः ।
पण्डिताद्विश्वविद्यायामध्यगीष्टातिपण्डितः ॥ १ ॥

अन्वयार्थ—(अथ) तदनन्तर (सखिमण्डितः) मित्रगणोंसे भूषित जीवंधरकुमारने (किंचित् विद्यागृहं) किसी विद्यालयको (आसाद्य) प्राप्त करके (विश्वविद्याया पडितात्) सम्पूर्ण विद्याओंमें पण्डित गुरुसे (अध्यगीष्ट) पढ़ा (पश्चात्) पश्चात् (अतिपण्डितः बभूव) बड़ा भारी पण्डित हुआ ॥ १ ॥

तस्य प्रश्रयशुश्रूषाचातुर्याद्गुरुगोचरात् ।
स्मृता इवाभवन्विद्या गुरुस्नेहो हि कामसूः ॥ २ ॥

अन्वयार्थ—(तस्य) उसको (गुरुगोचरात्) गुरुके विषयमें (प्रश्रयशुश्रूषाचातुर्याद्) विनय सेवा शुश्रुषा और चतुराईकी

प्रगटतासे (विद्या स्मृता इव) विद्यायें यादकी तरह (अभवन्) आ गई । अर्थात् जिस प्रकार भूली हुई वस्तु याद आ जाती है उसी तरह उसे विद्यायें प्राप्त हो गई ! अत्र नीतिः (ही) निश्चयसे (गुरुस्नेहः कामसूः) गुरुका प्रेम सम्पूर्ण इच्छाओंको पूरा करनेवाला होता है ॥ २ ॥

अनुजीवकमेवात्र जीवलोके विपश्चितः ।
इति निश्चयतः सूरिः सुतरां प्रीतिमव्रजत् ॥ ३ ॥

अन्वयार्थः—(अत्र जीवलोके) इस संसारमें (विपश्चितः) जितने पण्डित हैं वे सब (जीवकं अनु एव) जीवधरसे हीन (कम योग्यताके) ही हैं (इति निश्चयतः) ऐसा निश्चय होनेसे (सूरिः) पढानेवाले आचार्य (सुतरां प्रीतिं) स्वयमेव उस पर प्रसन्न (अव्रजत्) होते भये ॥ १०३ ॥

आत्मकृत्यमकृत्यं च सफलं प्रीतये नृणाम् ।
किं पुनः श्लाध्यभूतं तत्किं विद्यास्थापनात्परम् ॥४॥

अन्वयार्थ—(नृणाम्) मनुष्योंको (आत्मकृत्यं) अपना कार्य (अकृत्यं च) बुरा भी (सफलं) सफल होने पर (प्रीतये) प्रीतिकर (भवति) होता है तो फिर (श्लाध्यभूतं) अच्छा काम (किं पुनः वक्तव्यं) क्यों अच्छा नहीं लगेगा ? लगेगा ही, उसमें भी (विद्या स्थापनात्परं तत्किं) विद्या स्थापनसे (विद्यादानसे बढ कर) और दूसरा कौन अच्छा काम है ? (कोई भी अच्छा काम नहीं है) ॥ ४ ॥

अथ प्रसन्नधीः सूरिरन्तेवासिनमेकदा ।
एकान्ते हि निजप्रान्तमावसन्तमचीकथत् ॥ ५ ॥

अन्वयार्थः—(अथ) इसके अनंतर (एकदा) एक दिन (प्रसन्नधीः) प्रसन्नचित्त (सूरिः) गुरुने (निज प्रान्तं आवसन्तं) अपने पास रहनेवाले (अन्तेवासिनं) शिष्यसे (एकान्ते) एकान्तमें (अचीकथत्) कहा ॥ ५ ॥

श्रुतशालिन्महाभाग श्रूयतामिह कस्यचित् ।
चरितं चरितार्थेन यदत्यर्थं दयावहम् ॥ ६ ॥

अन्वयार्थ—(श्रुतशालिन्महाभाग) हे शास्त्रज्ञानसे शोभित उत्तम भाग्यवाले ! (इह) इस लोकमें प्रसिद्ध (कस्यचित्) किसीके (चरितं) चरित्रको (श्रूयतां) सुनो ! (यत् चरितं) जो चरित्र (चरितार्थेन) सुननेसे (अत्यर्थं) अत्यत (दयावहम्) दया करनेवाला है ॥ ६ ॥

विद्याधरास्पदे लोके लोकपालाह्वयान्वितः ।
लोकं वैपालयन्भूपः कोऽपि कालमजीगमत् ॥ ७ ॥

अन्वयार्थ —(विद्याधरास्पदेलोके) विद्याधरोंका है स्थान जिसमें ऐसे लोकमें (लकपालाह्वयान्वितः) लोकपाल है नाम जिसका ऐसा (कोऽपि भूपः) कोई राजा (लोकं वैपालयन्) प्रजाका पालन करता हुआ (काल अजीगमत्) कालको विताता भया ॥ ७ ॥

क्षणक्षीणत्वमैश्वर्ये क्षीवाणामिव बोधयत् ।
क्षेपीयः पश्यतां नश्यदभ्रमैक्षिष्ट सोऽधिराट् ॥ ८ ॥

अन्वयार्थ—एक दिन (सः अधिराट्) उस राजाने (क्षीवाणां) धनोन्मत्त पुरुषोंको (ऐश्वर्ये) ऐश्वर्यमें (क्षणक्षीणत्वं) क्षण मात्रमें नष्ट हो जाता है ? (इति) ऐसा (बोधयत्) बोध करानेवालेके सदृश

और (पश्यतां अग्रे) देखने वालोंके अगाड़ी (क्षेपीयः नश्यत्) शीघ्र ही नाश होनेवाले (अभ्रं) मेघको (ऐक्षिष्ट) देखा ॥ ८ ॥

तद्वीक्षणेन वैराग्यं विजजृम्भे महीभुजः ।
पम्फुलीति हि निर्वेगो भव्यानां कालपाकतः ॥९॥

अन्वयार्थः—(तद्वीक्षणेन) उस मेघको देख कर (महीभुजः) राजाको (वैराग्यं) वैराग्य (विजजृम्भे) उत्पन्न हो गया । अत्र नीतिः (ही) निश्चयसे (भव्यानां) भव्य पुरुषोंके (कालपाकतः) काल लब्धिके आजाने पर (निर्वेगः) निर्वेग (सांसारिक विषयोंमें उदासीनता) भाव (पम्फुलीति) अतिशयतासे प्रगट हो जाता है । अर्थात् समय आजाने पर भव्य आत्माओंका कार्य शीघ्र सिद्ध हो जाता है ॥ ९ ॥

ततोऽयं पुत्रनिक्षिप्तराज्यभारः क्षितीश्वरः ।
जैनीं दीक्षामुपादत्त यस्यां कायेऽपि हेयता ॥ १० ॥

अन्वयार्थः—(ततः) इसके पश्चात् (पुत्रनिक्षिप्तराज्यभारः) पुत्रके ऊपर छोडा है राज्यभारको जिसने ऐसे (अयं क्षितीश्वरः) इस राजाने (जैनीं दीक्षां) जैनीकी दीक्षा (उपादत्त) धारण की ! (यस्यां) जिस दीक्षाके अंदर (कायेऽपि) शरीरमें भी (हेयता) त्याग बुद्धि होती है ॥ १० ॥

तपांसि तप्यमानस्य तस्य चासीदहो पुनः ।
भस्मकाख्यो महारोगो भुक्तं यो भस्मयेत्क्षणात् ॥११॥

अन्वयार्थः—(पुनश्च) और फिर (अहो) खेद है ! (तपांसि तप्यमानस्य) तपको तपते हुए (तस्य) तपस्वी उस राजाको (भस्म-

काख्यः) भस्मक नामका (महारोगः) महारोग (आसीत्) उत्पन्न हुआ (यः) जो रोग (भुक्तं) खाये हुए अत्यंत पौष्टिक पदार्थोंको भी (क्षणात्) क्षण मात्रमें (भस्मयेत्) भस्म कर देता है ॥ ११ ॥

न हि वारयितुं शक्यं दुष्कर्माल्पतपस्यया ।
विस्फुलिङ्गेन किं शक्यं दग्धुमार्द्रमपीन्धनम् ॥१२॥

अन्वयार्थः—(हि) निश्चयसे (अल्प तपस्या) थोडीसी तपस्याके द्वारा (दुष्कर्म) खोटा कर्म (निवारयितु) निवारण करनेके लिये कोई भी (न शक्यं) समर्थ नहीं हो सकता ? (किं) क्या (विस्फुलिङ्गेन) अग्निकी जरासी चिगारीसे (आर्द्र इन्धनम्) गीला ईन्धन (दग्धु शक्यं) जलनेके लिये समर्थ है ? (अपि तु दग्धं न शक्यं) अर्थात् जलनेके लिये समर्थ नहीं है ॥ १२ ॥

अशक्त्यैव तपः सोऽयं राजा राज्यमिवात्यजत् ।
श्रेयांसि बहुविघ्नानीत्येतन्नह्यधुनाभवत् ॥ १३ ॥

अन्वयार्थः—(सः अयं राजा) उस इस राजाने (अशक्त्या एव) शक्ति हीनपनेसे (राज्यमिव) राज्यकी तरह (तप अत्यजत्) तप करना छोड़ दिया। अत्रनीतिः (हि) निश्चयसे (श्रेयांसि बहु विघ्नानि) कल्याणकारी कार्य बहुत विघ्नवाले (भवंति) होते है (इति एतद् अधुना न अभवत्) यह किंवदंती अभी ही नही हुई किंतु पहलेसे चली आती है ॥ १३ ॥

तपसाच्छादितस्तिष्ठन्स्वैराचारी हि पातकी ।
गुल्मेनान्तर्हितो गृह्णन्विष्करानिव नाफलः ॥ १४॥

अवर्तिष्ट यथेष्टं स पाषण्डितपसा पुनः ।
चित्रं जैनी तपस्या हि स्वैराचारविरोधिनी ॥ १५ ॥
युग्मम्

अन्वयार्थः—(पुनः) इसके पश्चात् (स) वह (स्वैराचारी पातकी) स्वेच्छाचारी पापी पुरुष (गुल्मेनांतर्हितः) छोटे वृक्षसे छिपे हुये (विष्करान् गृह्णन्) चिड़ियोंको पकडनेवाले (नाफल इव) व्याधके सदृश (तपसाच्छादितः तिष्ठन्) झूठे तपसे आच्छादित होता हुआ अर्थात् तपके बहानेसे (पाषण्ड तपसा) पाखण्ड तपके द्वारा (यथेष्टं) इच्छानुसार इधर उधर (अवर्तिष्ट) घूमता भया। अत्र-नीतिः (चित्रं) आश्चर्य है ? (हि) निश्चयसे (जैनी तपस्या) जैन धर्मके अनुकूल तपश्चरण (स्वैराचारविरोधनी) स्वच्छंद आचरणका विरोधी है ॥ १५ ॥

अथ भिक्षुर्बुभुक्षुः सन् गन्धोत्कटगृहं गतः ।
उपतापरुजोऽप्येष धार्मिकाणां भिषक्तमः ॥ १६ ॥

अन्वयार्थः—(अथ) तदनंतर (भिक्षु) भिक्षुक(बुभुक्षुः सन्) भूखसे पीड़ित होता हुआ (गंधोत्कट गृहंगतः) गधोत्कट सेठके घर गया। तो भी (एष) यह तापसी (उपताप रुजः अपि) रोगसे पीड़ित होता हुआ भी (धार्मिकाणां) धर्मात्मा पुरुषोंका (भिषक्तमः) उत्तम वैद्य था ॥ १६ ॥

धार्मिकाणां शरण्यं हि धार्मिका एव नापरे ।
अर्हन्कुलवत्तेषां प्रकृत्यान्ये हि विद्विषः ॥ १७ ॥

अन्वयार्थः—(हि) निश्चयसे (धार्मिकाणां) धार्मिक पुरुषोंके (शरण्यं) रक्षक (धार्मिकाएव) धार्मिक पुरुष ही होते हैं (अपरे न)

दूसरे नहीं। और (अन्ये) दुर्जन पुरुष (तेषा) सज्जन पुरुषोंके (अहेः नकुलवत्) सर्पनौलेके सदृश (प्रकृत्याः) स्वभावसे (विद्विषः) शत्रु होते हैं ॥ १७ ॥

तत्र मध्येगृहं भिक्षुरद्राक्षीत्पुत्रपुंगवम् ।
अङ्गत्वां त्वं च तं वीक्ष्य तद्बुभुक्षामलक्षयः ॥ १८॥

अन्वयार्थः—(तत्र) वहां पर (भिक्षुः) भिक्षुकने (गृहं मध्ये) गृहके मध्यमे (हे अङ्ग) हे अङ्ग (पुत्रपुङ्गवम्) पुत्रोंमें श्रेष्ठ (त्वां) तुमको (अद्राक्षीत्) देखा (च) और (त्वं) तुमने (तं वीक्ष्य) उसको देख करके (तद् बुभुक्षां) उसकी भूखको (अलक्षयः) जान लिया ॥ १८ ॥

भोक्तुमारभमाणस्त्वं पौरोगवमचीकथः ।
भोज्यतामयमित्येष पुनरेनमबूभुजत् ॥ १९ ॥

अन्वयार्थ—(भोक्तुं आरभमाणः) भोजन करनेके लिये प्रवृत्त (त्वं) तुमने (अयं भोज्यतां) इनको भोजन कराओ (इति पौरोगवम्) ऐसा रसोइयेसे (अचीकथः) कहा (पुनः) फिर (एषः) इस रसोइयेने (एनं) इनको (अबुभुजत्) भोजन कराया ॥ १९ ॥

अन्नैस्तद्गृहसंपन्नैर्नाभूत्तत्कुक्षिपूरणम् ।
अहो पापस्य घोरत्वमाशाब्धिः केन पूर्यते ॥ २० ॥

अन्वयार्थः—(तद्गृहसम्पन्नैः) उस घरमें तैयार (अन्नैः) अन्नसे (तत्कुक्षि पूरणम्) इस भिक्षुककी उदरपूर्ति (न अभूत्) नहीं हुई अत्र नीतिः (अहो) अहो। पापस्य घोरत्वं) (पापका भयंकरपना कैसा

है ? (आशाब्धिः) आशासमुद्र (केन पूर्यते) किससे पूर्ण ह सकता है ॥ २० ॥

अभुञ्जानस्त्वमाश्चर्यादासीनोऽस्मै वितीर्णवान् ।
कारुण्यादस्य पुण्याद्वा करस्थं कवलं मुदा ॥ २१ ॥

अन्वयार्थः—(अभुञ्जानः) नहीं भोजन करते हुए औ (आश्चर्याद् आसीनः) आश्चर्यसे बैठे हुए (त्वं) तुमने (कारुण्यात् करुणासे (वा अस्य पुण्यात्) अथवा इसके पुण्यसे (करस्थं) हाथ रक्खे हुए (कवलं) ग्रासको (मुदा) हर्षसे (अस्मै) इसे (वितीर्णवान् देदिया ॥ २२ ॥

वर्णिनो जठरं पूर्णं तदास्वादनतः क्षणात् ।
आशाब्धिरिव नैराश्यादहो पुण्यस्य वैभवम् ॥ २२ ॥

अन्वयार्थः—जैसे (नैराश्यात्) निराश पनेसे (आशाब्धि-रिव) आशा रूपी समुद्र पूर्ण हो जाता है उसी तरह (वर्णिनः जठरं) उस तपस्वीका उदर (तदास्वादनतः) उसके स्वाद मात्रसे (क्षणात् पूर्ण अभूत) क्षण मात्रमें पूर्ण हो गया (अहो) अहो (पुण्यस्य वैभवम्) पुण्यकी बड़ी सामर्थ्य है ॥२२॥

परिव्राडपि संप्राप्य सौहित्यं तत्क्षणे चिरात् ।
महोपकारिणोऽस्याहं किं करोमीत्यचिन्तयत् ॥२३॥

अन्वयार्थः—(परिव्राडपि) तपस्वीने भी (तत्क्षणे) उसी समय (चिरात्) बहुत कालके पश्चात् (सौहित्यं संप्राप्य) रोगनि-वृति (स्वास्थता) को प्राप्त करके (अस्य महोपकारिणः) इस महोपकारीका (अहं) मैं (किं करोमि) क्या उपकार करूं (इति अचिन्तयत्) ऐसा विचार किया ॥ २३ ॥

अपश्चिमफलां विद्यां निश्चित्यात्र प्रतिक्रियाम् ।
आयुष्मन्तमसौ पश्चाद्विपश्चितमकल्पयत् ॥ २४ ॥

अन्वयार्थः—(पश्चाद् असौ) फिर इसने (अपश्चिम फलां विद्या) उत्कृष्ट फलवाली विद्याको (अस्य प्रतिक्रियाम्) इसका प्रत्युकार (निश्चित्य) निश्चय करके (आयुष्यन्तं) चिरंजीवी जीवन्धरको (विपश्चितं अकल्पयत्) विद्वान बना दिया ॥ २४ ॥

विद्या हि विद्यमानेयं वितीर्णापि प्रकृष्यते ।
नाकृष्यते च चोराद्यैः पुष्यत्येव मनीषितम् ॥ २५ ॥

अन्वयार्थ—(हि) निश्चयसे (विद्यमान भी (इयं विद्या) यह विद्या (वितीर्णापि) दुसरेके लिये दी हुई भी (प्रकृष्यते) वृद्धिको प्राप्त होती है और यह (चौराद्यैः) चोरोंसे (न आकृष्यते) नहीं चुराई जा सकतीं प्रत्युत (मनीषितं) इच्छित कार्यको (पुष्यति एव) पुष्ट करती है ॥ २५ ॥

वैदुष्येण हि वंश्यत्वं वैभवं सदुपास्यता ।
सदस्यतालमुक्तेन विद्वान्सर्वत्र पूज्यते ॥ २६ ॥

अन्वयार्थः—(हि) निश्चयसे (वैदुष्येण) पाण्डित्य वाविद्यासे (वंश्यत्वं) कुलीनता, (वैभवं) प्रभुत्व, (सदुपास्यता) सज्जन पुरुषोंसे पूज्यपना और (सदस्यता) सज्जनता होती है (उक्तेन अलं) बहुत कहनेसे क्या (विद्वान् सर्वत्र पूज्यते) बुद्धिमान पुरुष सब जगह पूजा जाता है ॥ २६ ॥

वैपश्चित्यं हि जीवानामाजीवितमनिन्दितम् ।
अपवर्गेऽपि मार्गोऽयमदः क्षीरमिवौषधम् ॥ २७ ॥

अन्वयार्थः—(हि) निश्चयसे (जीवानां) मनुष्योंका (वैपश्चित्यं) पाण्डित्य (आजीवतम्) जीवनपर्यन्त (अनिन्दितम्) प्रशंसनीय है और (अयं) यह (अपवर्गे अपि मार्गः) मोक्षका भी मार्ग है ? (अद: क्षीरं औषधं इव) जैसे दूध शरीर पुष्ट करने वाला होता हुआ भी औषधी है ॥ २७ ॥

इत्युदन्तं गुरोः श्रुत्वा शिष्यो नोत्तरमूचिवान् ।
स्ववाचा किंतु वक्त्रेण शैष्योपाध्यायिका हि सा २८

अन्वयार्थ.—(शिष्यः) शिष्यने (इति गुरोः उदन्तं) इस प्रकार गुरूके वृतान्तको (श्रुत्वा) सुनकरके (स्वः वाचा नोत्तरं ऊचिवान्) उसने अपनी वाणीसे उत्तर नहीं दिया किंतु (वक्त्रेण एव) मुखकी चेष्टासे ही (उत्तर ऊचिवान्) उत्तर दिया । अत्र नीतिः (हि) निश्चयसे (सा एव शैष्योपाध्यायिका) यही शिष्य और गुरुपना है । अर्थात् शिष्ट शिष्य गुरुके समीप वाचालित नहीं होते है ॥ २८ ॥

नोटः-छटवें श्लोकसे लेकर अट्ठाईसवे श्लोक तक गुरूने जीवंधरसे अपना वृत्तान्त कहा ॥ २८ ॥

विज्ञातगुरुशुद्धिः स विशेषात्पिप्रियेतराम् ।
माणिक्यस्य हि लब्धस्य शुद्धेर्मोदो विशेषतः ॥२९॥

अन्वयार्थः—(विज्ञात गुरु शुद्धिः सः) जान ली है गुरुकी शुद्धि जिसने ऐसा यह जीवंधरकुमार (विशेषतः) और अधिक रीतिसे (पिप्रियेतराम्) प्रसन्न हुआ । अत्र नीतिः (हि) निश्चयसे (लब्धस्य माणिक्यस्य) प्राप्त हुई मणिके (शुद्धेः) ज्ञानादिके ऊपर

शुद्धि हो जानेसे (विशेषतः) विशेष रीतिसे (मोदो भवति) हर्ष होता है ॥ २९ ॥

रत्नत्रयविशुद्धः सन्पात्रस्नेही परार्थकृत् ।
परिपालितधर्मो हि भवाब्धेस्तारको गुरुः ॥ ३० ॥

अन्वयार्थः—(हि) निश्चयसे (यः रत्नत्रयविशुद्धःसन्) जो सम्यग्दर्शन, ज्ञान, चरित्रसे विशुद्ध होता हुआ, (पात्रस्नेही) पात्रमें स्नेह करनेवाला, (परार्थकृत्) परोपकारी, (परिपालित धर्मः) धर्मका पालन करनेवाला और (भवाब्धेः तारकः) संसाररूपी समुद्रसे तारनेवाला हो (स. गुरु अस्ति) वह गुरु है अथात् ऐसा गुरू होना चाहिये ॥ १० ॥

गुरुभक्तो भवाद्भीतो विनीतो धार्मिकः सुधीः ।
शांतस्वान्तो ह्यतन्द्रालुः शिष्टः शिष्योऽयमिष्यते ३१

अन्वयार्थः—(यः गुरुभक्तः) जो गुरुभक्त, (भवाद् भीत.) ससारसे भयभीत, (विनीतः) विनयी, (धार्मिकः) धर्मात्मा, (सुधीः) उत्तम बुद्धिवाला (शान्तस्वान्तः) हृदयका शान्त, (अतंद्रालुः) आलस्य रहित और (शिष्टः) उत्तम आचरणवाला हो (सोऽयं शिष्यः इष्यते) वह शिष्य माना गया है। अर्थात् शिष्य ऐसा होना चाहिये ॥ ३१ ॥

गुरुभक्तिः सती मुक्त्यै क्षुद्रं किं वा न साधयेत् ।
त्रिलोकीमूल्यरत्नेन दुर्लभः किं तुषोत्कर : ॥३२॥

अन्वयार्थ—जब (सती गुरुभक्तिः समीचीन गुरुकी भक्ति (मुक्त्यै भवति) मुक्तिकी प्राप्तिके लिये होती है ? तो फिर

(क्षुद्रं किं वा न साधयेत्) क्षुद्र किस कार्यको साधन नहीं करैगी? करैगी ही। जैसे (त्रिलोकी मूल्यरत्नेन) तीन लोक है मूल्य जिसका ऐसे रत्नसे (तुषोत्कर) भूसेका ढेर मिलना (किं दुर्लभः) क्या दुर्लभ है? (अपि तु न दुर्लभः) किन्तु दुर्लभ नहीं है ॥२२॥

गुरुद्रुहां गुणः को वा कृतघ्नानां न नश्यति ।
विद्यापि विद्युदाभा स्यादमूलस्य कुतः स्थितिः ॥२३॥

अन्वयार्थ—(गुरुद्रुहां) गुरूसे द्रोह करनेवाले (कृतघ्नानां) कृतघ्नी–उपकारको भूलनेवालोंका (को वा गुणः) कौनसा गुण (न नश्यति नष्ट नहीं होता है? अर्थात् (सर्वे गुणः नश्यंते) सर्व गुण नष्ट हो जाते है (तेषां) उन लोगोंकी (विद्या अपि) विद्या भी (विद्युत् आभा स्यात्) विजलीके समान क्षणस्थायी होती है? ठीक है (अमूलस्य स्थितिः कुतः भवति) जडरहितकी स्थिति कैसे हो सकती है? नही हो सकती। अर्थात् विना कारणके कोई वस्तु नहीं ठहर सकती है ॥ २३ ॥

गुरुद्रुहो न हि क्वापि विश्वास्यो विश्वघातिनः ।
अबिभ्यतां गुरुद्रोहादन्यद्रोहात्कुतो भयम् ॥ ३४ ॥

अन्वयार्थः—(हि) निश्चयसे (क्वापि) कही पर भी (विश्वघातिनः) सम्पूर्ण जगतके नाश करनेवाले (गुरुद्रुहो) गुरुद्रोहीका (न विश्वास्यः) विश्वास नहीं करना चाहिये क्योंकि (गुरुद्रोहात् अबिभ्यतां) गुरुद्रोहसे नही डरनेवाले पुरुषोंको (अन्य द्रोहात्) दूसरोंके साथ द्रोह करनेसे (कुतः भयम्) कैसे भय हो सकता है? अर्थात् नही हो सकता ॥ ३४ ॥

अथ कृत्यविदाचार्यः कृतकृत्यं यथाविधि ।
छात्रं प्रबोधयामास सद्धर्मं गृहमेधिनाम् ॥ ३५ ॥

अन्वयार्थ.—(अथ) इसके अनंतर (कृत्यवित् आचार्य.) कृत्यके जाननेवाले आचार्यने (कृतकृत्य छात्रं) समाप्त हो गये हैं पठनादि कार्य जिनके ऐसे छात्र (जीवधर)को (यथाविधि) विधि पूर्वक (गृहमेधिनाम् सद्धर्मं) गृहस्थोके एक देश विरतिरूपी धर्मका (प्रबोधयामास) ज्ञान कराया ॥ ३५ ॥

पुनश्च राजपुत्रत्वमपि बोधयितुं गुरुः
अनुगृह्याभ्यधात्तस्य तदुदन्तमिदंतया ॥ ३६ ॥

अन्वयार्थ —(पुनश्च गुरु·) फिर गुरूने (अनुगृह्य) अनुग्रह करके (राजपुत्रत्वं बोधयितु अपि) तुम राजाके पुत्र हो ऐसा बोध करानेके लिये ही (तस्य) उस जीवधरका (तदुदन्तं) पूर्वोक्त सारा वृत्तान्त (इदतया अभ्यधात्) इस रीतिसे कहा कि जीवंधरसे इतर कोई पुरुष न जान सके ॥ ३६ ॥

काष्टाङ्गारमसौ ज्ञात्वा राजघं गुरुवाक्यतः ।
सत्यंधरात्मजः क्रोधात्संनाहं तद्वधे व्यधात् ॥३७॥

अन्वयार्थः—(असौ सत्यंधरात्मजः) इस सत्यंधर राजाके कुमार जीवंधरने (गुरुवाक्यतः) गुरूके वचनोंसे (काष्टाङ्गारं) काष्टाङ्गारको (राजघ) राजाका मारनेवाला (ज्ञात्वा) जानकर (तद्वधेः) उसके मारनेके लिये (संनाहं) युद्धकी तैयारी (व्यधात्) की ॥ ३७ ॥

मुहुर्निवार्यमाणोऽपि सूरिणा न शशाम सः ।
हन्तात्मानमपि घ्नन्तः क्रुद्धाः किं किं न कुर्वते ॥३८॥

अन्वयार्थः—(सूरिणा) आचार्यसे (मुहुर्निवार्यमाणः अपि) वारवार रोका हुआ भी (सः न शशाम) वह कुमार शान्त नहीं हुआ । (हन्त) खेद है ! (आत्मानं अपि) अपनी आत्माको भी (घ्नंतः) नाश करते हुये (क्रुद्धाः) क्रोधी पुरुष (किं किं न कुर्वते) क्या क्या कर्म नहीं कर डालते हैं ॥ ३८ ॥

वत्सरं क्षम्यतामेकं वत्सेयं गुरुदक्षिणा ।
गुरुणेति निषिद्धोऽभूत्कोऽनन्धो लङ्घयेद् गुरुम् ॥३९॥

अन्वयार्थः—(हे वत्स) हे बाल ! (एकं वत्सरं) एक वर्ष और (क्षम्यतां) क्षमा करो (इयं गुरु दक्षिणा) यह ही मेरे पढ़ानेकी गुरु दक्षिणा समझो (इति) इस प्रकार (गुरुणा) गुरूसे (निषिद्धः अभूत्) निषेधित होता भया । (कः अनन्धः) कौन सुलोचन (ज्ञानचक्षु) पुरुष (गुरु लङ्घयेत्) गुरुके आदेशको उल्लंघन करता है ॥ ३९ ॥

पश्यन्कोपक्षणे तस्य पारवश्यमसौ गुरुः ।
अशिक्षयत्पुनश्चैनमपथघ्नी हि वाग्गुरोः ॥ ४० ॥

अन्वयार्थः—(पुनश्च असौ गुरुः) फिर इस गुरूने (कोपक्षणे) कोपके समय (तस्य पारवश्यम् पश्यन्) उसकी पराधीनताको देख (एनं) इसे (अशिक्षयत्) शिक्षा दी । अत्र नीतिः (हि) निश्चयसे (गुरोःवाक्) गुरुका वचन (अपथघ्नी) खोटे मार्गका नाश करनेवाला होता है ॥ ४० ॥

अवशः किमहो मोहादकुपः पुत्रपुङ्गव ।
सति हेतौ विकारस्य तदभावो हि धीरता ॥४१॥

अन्वयार्थः—(हे पुत्र पुङ्गव) हे श्रेष्ठ पुत्र ! (त्वं) तुम (मोहात्) मोहसे (अवशः) विवश होकर (किं) क्यों (अकुपः) कोप करते हो । (अत्र नीतिः) (हि) निश्चयसे (विकारस्य हेतौ सति) विकारका कारण होने पर (तद् अभावः) विकारका न होना ही (धीरता) धीरता है ॥ ४१ ॥

अपकुर्वति कोपश्चेत्किं न कोपाय कुप्यसि ।
त्रिवर्गस्यापवर्गस्य जीवितस्य च नाशिने ॥ ४२ ॥

अन्वयार्थः—(चेत्) यदि (अपकुर्वति कोपः) अपकार करनेवालेसे तुम्हारा कोप है तो फिर (त्रिवर्गस्य) धर्म, अर्थ, कामका, (अपवर्गस्य) मोक्षका, और (जीवतस्य) जीवनका (नाशने) नाश करनेवाले (कोपाय) कोपके लिये (कि) क्यों (न कुप्यसि) कोप नहीं करते हो ॥ ४२ ॥

दहेस्त्वमेव रोषाग्निर्नापरं विषयं ततः ।
क्रुध्यन्निक्षिपति स्वाङ्गे वह्निमन्यदिधक्षया ॥४३॥

अन्वयार्थः—(रोषाग्निः) क्रोधरूपी अग्नि (त्वं एव) अपने आप ही को (दहेत्) जलाती है अर्थात् क्रोधीको ही पहले भस्म करती है ! (अपरं विषयं न) दूसरे पदार्थको नहीं । (ततः) इसलिये (क्रुध्यन्) क्रोधी पुरुष (अन्य दिधक्षया) दूसरेको जलानेकी इच्छासे (स्वाङ्गे) पहले अपने शरीरमें ही (वह्नि) अग्निको (निक्षिपति) डालता है ॥ ४३ ॥

हेयोपादेयविज्ञानं नो चेद्व्यर्थः श्रमः श्रुतौ ।
किं व्रीहिखण्डनायासैस्तण्डुलानामसंभवे ॥४४॥

अन्वयार्थः—(चेत्) यदि (हेयोपादेय विज्ञानं नो) हेय वा उपादेयका ज्ञान नहीं है (तर्हि) तो (श्रुतौ) शास्त्रमें (श्रमः) परिश्रम करना (व्यर्थः) व्यर्थ है क्योंकि (तण्डुलानां असभवे) चावलोके नहीं निकलने पर (व्रीहिखण्डनायासैः किं) धान्यके कूटनेसे क्या फायदा ? अर्थात् कुछ भी फायदा नहीं है ॥४४॥

तत्त्वज्ञानं च मोघं स्यात्तद्विरुद्धप्रवर्तिनाम् ।
पाणौ कृतेन दीपेन किं कूपे पततां फलम् ॥४५॥

अन्वयार्थः—(तद्विरुद्धप्रवर्तिनां) शास्त्र वा तत्वज्ञानके विरुद्ध प्रवृत्ति करनेवाले पुरुषोंका (तत्वज्ञान च) तत्वज्ञान भी (मोघं स्यात्) वृथा है ! (कूपे पततां) कूएमें गिरते हुए पुरुषोंको (पाणौ कृतेन दीपेन) हाथमें रक्खे हुये दीपकसे (किं फलं) क्या फल है ? अर्थात् कुछ भी फल नहीं है ॥ ४५ ॥

तत्वज्ञानानुकूलं तदनुष्ठातुं त्वमर्हसि ।
मुषितं धीधनं नस्याद्यथा मोहादिदस्युभिः ॥४६॥

अन्वयार्थः—(तत्तस्मात्) इसलिये (त्वं) तुम (तत्वज्ञानानुकूल) तत्वज्ञानके अनुकूल (अनुष्ठातुं) प्रवृत्ति करनेके लिये (अर्हसि) योग्य हो (यथा) जिससे (मोहादिदस्युभिः) मोहादिक लुटेरोंसे तुम्हारा (धीधनं) बुद्धिरूपी धन (मुषितं न स्यात्) चुराया नहीं जावे ॥ ४६ ॥

स्त्रीमुखेन कृतद्वारान्स्वपथोत्सुकमानसान् ।
दुर्जनाहीञ्जहीहि त्वं ते हि सर्वंकषाः खलाः ॥४७॥

अन्वयार्थः—और (त्वं) तुम (स्त्रीमुखेन कृतद्वारान्) स्त्रियोंके जरियोंसे किया है प्रवेश जिन्होने और (स्वपथोत्सुक मानसान्) अपने खोटे मार्ग पर चलनेके लिये उत्कंठित है मन जिनका ऐसे (दुर्जनाहीन्) दुर्जन रूपी भयंकर सर्पोको (जहीहि) दूरसे ही छोड दो अर्थात् उनके साथ सम्बन्ध मत कर (हि) निश्चयसे (ते खलाः) वे दुर्जन पुरुष (सर्वंकषा.) सम्पूर्ण पुरुषोंको दुःख देनेवाले होते हैं ॥ ४७ ॥

स्पृष्टानामहिभिर्नश्येद्गात्रं खलजनेन तु ।
वंशवैभववैदुष्यक्षान्तिकीर्त्यादिकं क्षणात् ॥४८॥

अन्वयार्थ·—(अहिभि स्पृष्टाना) सर्पोंसे डसे हुए पुरुषोंका केवल (गात्रं नश्येत्) शरीर ही नष्ट होता है (तु) किन्तु (खलजनेन स्पृष्टानां) दुर्जन पुरुषोंका सम्बन्ध करनेवाले पुरुषोंका (वंशवैभववैदुष्यक्षान्तिकीर्त्यादिकं) कुल, सम्पत्ति, पाण्डित्य, क्षमा और कीर्त्यादिक गुण (क्षणात्) उसी क्षणसे (नश्येत्) नाशको प्राप्त हो जाते है ॥ ४८ ॥

खलः कुर्यात्खलं लोकमन्यमन्यो न कंचन ।
न हि शक्यं पदार्थानां भावनं च विनाशवत् ॥४९॥

अन्वयार्थ.—(खलः) दुर्जन पुरुष (लोकं) लोकको (खलं) दुर्जन (कुर्यात) बना देता है किन्तु (अन्यः) सज्जन पुरुष (कंचन) किसीको भी (अन्य न कुर्यात) सज्जन नही कर सकता । (हि)

निश्चयसे (पदार्थानां) पदार्थोंके विनाशकी तरह उनका [भावनं] पैदा करना (न शक्यं) शक्य नहीं है।

अर्थात्–जिस प्रकार किसी पदार्थका नाश कर देना बिलकुल सरल है उसी प्रकार उसका बनाना अत्यन्त दुःसाध्य है ॥४९॥

सज्जनास्तु सतां पूर्वं समावर्ज्याः प्रयत्नतः ।
किं लोके लोष्टवत्प्राप्यं श्लाघ्यं रत्नमयत्नतः ॥५०॥

अन्वयार्थः—(तु) और (सतां) सज्जन पुरुषोंको (प्रयत्नतः) प्रयत्नसे (पूर्वं) पहले (सज्जनाः समावर्ज्याः) सज्जनोंको पूजना चाहिये। (लोके) लोकमें (किं) क्या (लोष्टवत्) ढेलेके समान (श्लाघ्यं रत्न) प्रशंसनीय रत्न (अयत्नतः) विना प्रयत्नके (प्राप्य) मिल सकता है? अर्थात् नहीं मिल सकता ॥५०॥

जाग्रत्त्वं सौमनस्यं च कुर्यात्सद्वागलं परैः ।
अजलाशयसंभूतममृतं हि सतां वचः ॥ ५१ ॥

अन्वयार्थः—(सद्वाक्) सज्जन पुरुषोंका वचन (जागृत्व) जागृति (च) और (सौमनस्य) उत्तम सहृदयताको (कुर्यात्) करता है (परैः अलं) बहुत कहनेसे क्या? [हि] निश्चयसे (सतां वच) सज्जन पुरुषोंका वचन (अजलाशय सम्भूतं) अजलाशयसे उत्पन्न हुआ (अमृतं) अमृत है।

अर्थात्–अमृत अजलाशयरूप जड़ समुद्रसे पैदा होता है और वचनामृत अजलाशय (सचेतन) सत्पुरुषोंके मुखसे उत्पन्न होता है अतएव अमृतकी अपेक्षा सज्जन पुरुषोंका वचनामृत सर्वोत्कृष्ट है ॥५१॥

यौवनं सत्त्वमैश्वर्यमेकैकं च विकारकृत् ।
समवायो न किं कुर्यादविकारोऽस्तु तैरपि ॥५२॥

अन्वयार्थः—(यौवनं) युवावस्था (सत्वं) बल वा शरीर सामर्थ्य और (ऐश्वर्यं) ईश्वरता अर्थात् प्रभुपना (एकैकं) पृथक् पृथक् (विकारकृत्) विकार भावोंको करनेवाले है। अर्थात् इनमेसे प्रत्येकके होने पर मनुष्य कुपथमें प्रवृत्त होजाता है तो (समवाय) समुदाय अर्थात् समूह (कि) किस अनर्थक कार्यको (न कुर्यात्) नहीं करेगा ?-करैगा ही (तुतैः अपि) इसलिये इन तीनोंसे भी तुम्हारा चित्त (अविकारः अस्तु) विकार रहित होवै ? ऐसा आशीर्वाद गुरुने जीवंधरको दिया ॥५२॥

न हि विक्रियते चेतः सतां तद्धेतुसंनिधौ ।
किं गोष्पदजलक्षोभी क्षोभयेज्जलधेर्जलम् ॥५३॥

अन्वयार्थ.—(हि) निश्चयसे (सतां चेतः) सज्जन पुरुषोंका चित्त (तद्हेतु संनिधौ) विकारको कारण मिलने पर भी (न विक्रियते) विकारको प्राप्त नहीं होता है। (कि) क्या (गोष्पदजलक्षोभी) गायके खुर प्रमाण जलको मलिन करनेवाला मेंढक [जलधेः] समुद्रके (जलं) जलको (क्षोभयेत) क्षोभित कर सकता है ? कदापि नहीं ॥५३॥

देशकालखलाः किं तैश्चला धीरेव बाधिका ।
अवहितोऽत्र धर्मे स्यादवधानं हि मुक्तये ॥५४॥

अन्वयार्थः—(देशकालखलाः) देश, काल और दुर्जन ये (कि कुर्युः) क्या करेंगे (तैः चला) उनसे चलायमान (धीः एव बाधिका)

बुद्धि ही मनुष्यके चरित्रको बिगाड़ देती है इसलिये इस संसारमें (धर्मे) आत्माके स्वभावमें (अवहितः) स्थिर होना चाहिये (हि) निश्चयसे (अवधानं) अपनी आत्माके स्वभावमें स्थिर रहना (मुक्तये स्यात्) मोक्षकी प्राप्तिके लिये होता है ॥५४॥

शिक्षावचःसहस्रैर्वा क्षीणपुण्येन धर्मधीः ।
पात्रे तु स्फायते तस्मादात्मैव गुरुरात्मनः ॥५५॥

अन्वयार्थः—(क्षीण पुण्ये) क्षीणपुण्य पुरुषमे (शिक्षावचः सहस्रैः) हजार शिक्षा वचनोंसे (धर्म धीः) धर्मबुद्धि (न स्यात्) नहीं होती है (तु) और (पात्रे) उत्तम पात्रमें (स्फायते) विना उपदेशके ही धर्मबुद्धि प्राप्त होजाती है । (तस्मात्) इसलिये (आत्मनः) आत्माका (आत्मा एव) आत्मा ही (गुरुः अस्ति) गुरु है ॥५५॥

न शृण्वन्ति न बुध्यन्ति न प्रयान्ति च सत्पथम् ।
प्रयान्तोऽपि न कार्यान्तं धनान्धा इति चिन्त्यताम् ॥५६॥

अन्वयार्थः—(धनान्धाः) धनसे अन्धे पुरुष (सत्पथम्) आत्माकी उन्नतिके सच्चे मार्गको (न शृण्वन्ति) न तो सुनते हैं (न बुध्यन्ति) न जानते हैं और (न प्रयान्ति) न उसपर चलते हैं । (प्रयान्तः अपि) सत्पथ पर चलने पर भी (कार्यान्तं) कार्यके अन्त तक (कार्यके नतीजे तक) नही पहुंचते हैं (इति) ऐसा धनिक पुरुषोंके विषयमें तुम (चिन्त्यताम्) विचार करो ॥५६॥

इत्याशास्य तमाश्वास्य कृच्छ्रे स तपसे गतः ।
प्राणप्रयाणवेलायां न हि लोके प्रतिक्रिया ॥५७॥

अन्वयार्थः—(इति) इस प्रकार (तं) उस जीवंधरको (आशास्य) उपदेश रूप आशीर्वाद देकर (च) और (आश्वास्य) विश्वास दिलाकर (कृच्छ्रं) खेद है ! (सः) वह जीवंधरके गुरू आर्यनन्दी आचार्य (तपसे) तप करनेके लिये (गतः) चले गये । अत्र नीतिः (हि) निश्चयसे (अत्र लोके) इस संसारमें (प्राणप्रयाण वेलाया) प्राणोंके निकलनेके समय धर्मको छोडकर दूसरा कोई (प्रतिक्रिया न) उपाय नहीं है ॥ ९७ ॥

प्रव्रज्याथ तपः शक्त्या नित्यमानन्दमव्रजत् ।
निष्प्रत्यूहा हि सामग्री नियतं कार्यकारिणी ॥९८॥

अन्वयार्थः—(अथ) तदनन्तर (प्रव्रज्य) फिर दीक्षा लेकर उन गुरूने (तप शक्त्या) तपश्चरण की सामर्थ्यसे (नित्य आनन्द) शाश्वत आनन्द रूपी मोक्षको (अव्रजत्) प्राप्त किया । अत्र नीति (हि) निश्चयसे (निष्प्रत्यूहा) निर्विघ्न (सामग्री) सामग्री (नियत) नियमसे (कार्यकारिणी) कार्यको सिद्ध करनेवाली होती है ॥ ९८ ॥

तपोवनं गुरौ प्राप्ते शुचं प्रापत्स कौरवः ।
गर्भाधानक्रियामात्रन्यूनौ हि पितरौ गुरुः ॥ ९९ ॥

अन्वयार्थः—(गुरौ तपोवनं प्राप्ते) गुरूके तपोवनमे चले जानेपर (कौरवः) कुरुवशी उस जीवधरने (शुचप्रापत्) अत्यन्त शोक किया । अत्र नीतिः (हि) निश्चयसे (गर्भाधान क्रियान्यूनौ) गर्भ धारण क्रियासे रहित [गुरु.] गुरू (पितरौ) माता पिताके समान हैं ॥ ९९ ॥

तत्त्वज्ञानजलेनाथ शोकाग्निं निरवापयत् ।
शैत्ये जाग्रति किं नु स्यादातपार्तिः कदाचन ॥६०॥

अन्वयार्थः—(अथ) तदनन्तर जीवंधरने (तत्वज्ञानजलेन) तत्वज्ञान रूपी जलसे (शोकाग्निं) गुरुवियोगजन्य शोकरूपी अग्निको (निरवापयत्) निवारण किया (शैत्ये जागृति) शीतपनेके जागृत होने पर (ठंड रहने पर) (किं) क्या (आतपार्तिः) गर्मीके आतापका दुःख (कदाचन स्यात्) कभी हो सकता है ? कदापि नहीं ॥ ६० ॥

अथास्मिन्विद्यया कान्त्या विदुषां योषितां हृदि ।
रथे च योग्यया भाति तत्र प्रस्तुतमुच्यते ॥६१॥

अन्वयार्थः—(अथ) गुरुके वियोगके अनन्तर (विद्यया) पाण्डित्यतासे (विदुषां) विद्वानोंके (हृदि) हृदयमें और (कान्त्या) शरीरकी सौन्दर्यतासे (योषितां हृदि) स्त्रियोंके हृदयमें और योग्यतया) शस्त्रसंचालन योग्यतासे (रथे च) रथमें (अस्मिन् भाति) इस जीवंधरको शोभायमान होनेपर (तत्र प्रस्तुतं उच्यने) जो वृत्तान्त हुआ उसे कहते हैं ॥ ६१ ॥

अथैकदा समभ्येत्य राजाङ्गणभुवि स्थिताः ।
गावोऽवस्कन्दिता व्याधैरिति गोपा हि चुक्रुशुः॥६२॥

अन्वयार्थः—(अथ) इसके अनन्तर (एकदा) एक समय "हमारी (गावः) गायें (व्याधैः अवस्कन्दिता) व्याधोंने वनमें रोकली हैं" (इति) ऐसा (गोपाः) ग्वालिये (राजाङ्गणभुवि स्थिताः) राजद्वारके अङ्गणमें स्थित होकर (चक्रुशुः) चिल्लाये ॥ ६२ ॥

काष्ठाङ्गारोऽपि रुष्टोऽभूत्तदाक्रोशवचःश्रुतेः।
असमानकृतावज्ञा पूज्यानां हि सुदुःसहा ॥ ६३ ॥

अन्वयार्थः—(काष्टाङ्गारः अपि) काष्टाङ्गार भी (तदाक्रोश-वचःश्रुतेः) उन ग्वालियोंके चिल्लानेको सुनकर (रुष्टः अभूत्) व्याधोंपर रुष्ट हुआ। अत्र नीतिः (हि) निश्चयसे (असमान कृता-वज्ञा) छोटे पुरुषोंसे किया हुआ तिरस्कार (पूज्यानां) बडे पुरुषोंके (सुदुःसहा) सहन नहीं होता है ॥ ६३ ॥

पराजेष्ट पुनस्तेन गवार्थं प्रहितं बलम्।
स्वदेशे हि शशप्रायो बलिष्ठः कुञ्जरादपि ॥ ६४ ॥

अन्वयार्थः—(तेन) उस व्याध सेनाने (गवार्थं प्रहितं बलम्) गौओंको छुडानेके लिये भेजी हुई काष्टाङ्गारकी सेनाको (व्यजेष्ट) जीत लिया। अत्र नीतिः (हि) निश्चयसे (स्वदेशे) अपने स्थानपर (शशप्रायः जन्तुः) खरगोशके समान भी जन्तु (कुञ्जरात् अपि) हाथीसे भी (बलिष्ठः) बलवान हो जाता है अर्थात् थोडी संख्यावाली व्याध सेनाने बलवान् काष्टाङ्गारकी सेना जीत ली ॥ ६४ ॥

व्यजेष्ट व्याधसेनेति श्रुत्वा घोषोऽपि चुक्षुभे।
न बिभेति कुतो लोक आजीवनपरिक्षये ॥ ६५ ॥

